गुप्ता गुप्ततरा पूजा[4] प्रकटात् हानिरेव च ।
वरं पूजा न कर्त्तव्या पशोरग्रे च पार्वति ।। ३५।।
पुष्पाञ्जलित्रयेणपि यदि योनिं प्रपूजयेत् ।
तस्यालभ्यानि कर्म्माणि न सन्ति भुवनत्रये[5] ।। ३६।।

इति योनितंत्रे षष्ठः पटलः।। ६।।

हे महेशानि ! उसके पश्चात् पानभोजन करके क्षितिमण्डल में विचरण करना चाहिए। यदि पशुसाधक के संस्पर्श में आ जाय तो तुलसीमाला धारण करके हरिमन्दिर में वास करना चाहिए, कथोपकथन और श्रीहरि का कीर्त्तन करना एवं हरिभाव परायण होकर पशुसाधक के निकट विचरण करना चाहिए। ३३—३४

यह विद्या अर्थात् साधनपद्धति अत्यन्त, अप्रकाश्य है। इस विद्या का प्रकाशन करने से साधक के साधना की सिद्धिहानि होती है। हे पार्वति ! वरं पशु के सम्मुख पूजा नहीं करनी चाहिए। साधक यदि केवलमात्र पुष्पाञ्जलित्रय प्रदान करके भी योनिपीठ की अर्चना करे, तो उसके लिए त्रिभुवन में और कुछ दुष्प्राप्य नहीं है। (पाठान्तर मतानुसार —त्रिभुवन में उसका समस्त अशुभ कर्म नष्ट हो जाता है)। ३५—३६

योनितन्त्र के छठें पटल का अनुवाद समाप्त।

---

१ वीरेण सह चर्बणं। वीरोच्छिष्टन्त चर्ब्बणं। २ विधत्ते तुलसीमालां। ३ देवि। ४ विद्या। ५ तस्याशुभानि कर्म्माणि नश्यन्ति भुवनेत्रये।

सप्तमः पटलः

श्री महादेव उवाच–

अथ, वक्ष्ये महेशानि वीरसाधनमुत्तमम् ।
[1]यस्य विज्ञानमात्रेण जीवन्मुक्तश्च साधकः ।। १।।
दिव्यस्तु देववत् प्रायो वीरश्चोद्धतमानसः ।
यद्देशे विद्यते वीरः स देशः पूज्यते सुरैः ।। २।।
वीरदर्शनमात्रेण तीर्थ कोटिफलं लभेत् ।
वीरहस्ते जलं दत्त्वा मुक्तः कोटिकुलैः सह ।। ३।।
वीरं सन्तोष्य देवेशि किमलभ्यं जगत्रये ।
वीराणां जपकालस्त सर्वकालः प्रशस्यते[2] ।। ४।।
विल्वमूले श्मशाने वा प्रान्तरे वा गृहेऽथवा ।
एकलिङ्गे महायोनौ जप्यते साधकोत्तमैः[3] ।। ५।।
सर्वेषामन्नमाश्रित्य कुर्यात् स्वोदरपूरणं[4] ।
मद्यं[5]–मांस बिना देवि क्षणाद्ध्वं न जीवति।। ६।।

महादेव ने कहा – हे पार्वति ! अब मैं उत्तम वीरसाधनपद्धति के विषय में कहूँगा। इस साधना का ज्ञान लाभ होने से ही साधक जीवनमुक्त हो जाता है। १

दिव्यसाधकगण प्रायः देवतुल्य होते हैं। वीरसाधकगण उग्र एवं उद्धतमना होते हैं। जिस देश में वीरसाधक हों, देवगण भी उस देश की पूजा करते हैं। २

वीरसाधक के दर्शनमात्र से कोटितीर्थ के दर्शन का लाभ होता है। वीरसाधक को जलदान करने से दाता कोटिकुल के साथ मुक्त हो जाता है। ३

हे देवेशि ! वीर साधक को सन्तुष्ट करने से तीनों लोकों में कुछ भी अलभ्य नहीं होता । वीरगणों के जप के लिए सभी समय प्रशस्त काल होता है। ४

उत्तम वीरसाधक विल्वमूल, श्मशान, प्रान्तर प्रदेश, एकलिङ्ग मन्दिर या योनिपीठ में सदैव जप कर सकता है। ५

वीरमन्त्र का आश्रय लेकर वीरसाधक आहार ग्रहण कर उदरपूर्ति करे। मद्य एवं मांसाहार के बिना वीरसाधक एक क्षण से अधिक प्राण नहीं धारण कर सकता। ६

---

१ येषां। २ सर्वकाले प्रसंश्यते। ३ पूज्यते साधकोत्तमैः; जप्यते साधकोत्तमः। ४ सर्वेषां मनुमाश्रित्य कुर्याच्चोदरपूरणं। ५ मधू।

तस्मात् भुक्त्वा च पीत्वा च विहरेत् क्षितिमण्डले ।
सर्वेषामन्नमासाद्य[1] भोजनं चाकुतोभयम् ।। ७।।
मैथुनञ्च महेशानि सर्वयोनौ प्रशस्यते[2] ।
कदाचिच्चन्दनेनापि कदाचित् सुरयापि वा ।। ८।।
लेपनञ्च सदा कुर्यात् पङ्केन रजसापि वा[3] ।
सदानन्दमयो[4] दुर्गे[5] वीरश्चापि विराजते ।। ९।।
तत् साधनमहं वक्ष्ये सर्वं सर्वार्थसाधनम्[6] ।
स्नानादिर्मानसः शौचो मानसः प्रवरो जपः ।। १०।।
पूजनं मानसं दिव्यं मानसं तर्पणादिकम् ।
सर्वं एव शुभः कालो नाशुभो विद्यते क्वचित् ।। ११।।
न विशेषो दिवारात्रौ न सन्ध्यायां महानिशि[7] ।
वस्त्रासनं स्नान[8]—गेह—देहस्पर्शादिकेष्वपि ।। १२।।
शुद्धिं विचारयेन्नात्र[9] निर्विकल्पं मनश्चरेत् ।
दिक्काल—नियमो नास्ति स्थित्यादि—नियमो न च[10]।। १३।।

वीराचार के अनुसार पान और भोजन करके वीरसाधक क्षितिमण्डल में विचरण करता है। वह सभी प्रकार के अन्न को निर्विकार चित्त से भोजन करता है। हे महेशानि ! वीरसाधक के निकट मैथुन के लिए सभी योनि प्रशस्त होती है। वीर साधक अपनी देह पर कभी चन्दन, कभी सुरा, कभी पङ्क और कभी धूलि का अनुलेपन करता है। हे दुर्गे ! वीरसाधक सदा सदानन्दमयरूप में विराजमान रहता है। ७—९

मैं सर्वार्थसाधक वीरसाधन के विषय में कह रहा हूँ। इस साधना में स्नानादि समस्त शौचक्रिया भी मानसिक तथा श्रेष्ठ जप भी मानसिक होता है। इसमें मानसिक पूजा ही दिव्यपूजा तथा तर्पणादि भी मानसिक होती है। इस साधना में कालाकाल—विचार नहीं होता—सभी काल सभी कार्यों के लिए शुभ (प्रशस्त) होता है। इस साधना के लिए कोई काल किसी कार्य के लिए अशुभ नहीं होता। १०—११

इस साधना में दिवा, रात्रि, सन्ध्या या महानिशा के मध्य—किसी प्रकार का भेदाभेद या विशेष अविशेष नहीं है। इसमें वस्त्र, आसन, स्नान, गृह देहस्पर्श इत्यादि शुचि अथवा अशुचि प्रभृति किसी प्रकार का विचार नहीं करना चाहिए। १२

इसमें निर्विकार एवं निर्विकल्प चित्त होकर साधना में प्रवृत्त होना चाहिए। इसमें दिक, काल प्रभृति कोई विधि निषेध नहीं मानना होता, न तो, साधक की अवस्था नादि इत्यादि के विषय में किसी नियम को मानना होता है। १३

---

१ सर्वेषामन्नमाश्रित्य। २ प्रसंश्यते। ३ रजसा प्रिये। ४ सदानन्दमयं। ५ देवी। ६ माश्रित्य; सर्वसर्वज्ञसाधनं। ७ तथा निशि। ८ स्थान। ९ न चाचरेदत। १० दिव्यकालो नियमो नास्ति स्थित्यादि—नियमस्तथा।

न जपे काल[1]—नियमो नार्च्चादिषु[2] बलिष्वपि ।
स्त्रीद्वेषो नैन कर्त्तव्यो विशेषात् पूजनं स्त्रियाः ।। १४।।
स्त्रियं गच्छन् स्पृशन पश्यन् यत्र कुत्रापि साधकः ।
दत्त्वा भक्ष्य जपेन्मत्रं भक्ष्यद्रव्यं यथारुचि ।। १५।।
स्वेच्छानियमः संप्रोक्तो वीरसाधनकर्मणि ।
स्त्रियो देवाः स्त्रियः प्राणाः स्त्रियः परमभूषणम्[3] ।। १६।।
स्त्रीसङ्गिना सदा भाव्यमन्यथा स्व—स्त्रियामपि ।
तदुक्तं भावसर्वस्वे[4] सर्वतन्त्रेषु गोपितम् ।। १७।।
वीरसिद्धि[5]—विधानन्तु तव स्नेहात् प्रकाशितम् ।
द्रव्य—भक्षणकाले च आदौ शक्तौ निवेदयेत् ।। १८।।
अथवा प्रथमं भागं निक्षिपेज्जलमध्यतः ।
श्मशाने प्रान्तरे गत्वा शक्त्या युक्तोऽपि साधकः ।। १९।।
भुक्त्वा द्रव्यं जपेन्मत्रं जप्त्वा मैथुनमाचरेत्[6] ।
शुक्रोत्सरणकाले च शृणु पार्वति सुन्दरि ।। २०।।
योनितत्त्वं समादाय तिलकं क्रियते[7] यदि ।
शतजन्मार्ज्जितं पापं[8] तत्क्षणादेव नश्यति ।। २१।।

अर्चना, बलि जप प्रभृति किसी कार्य में किसी प्रकार का कालविचार या नियम—प्रतिपालन आवश्यक नहीं है। कभी स्त्री— द्वेश (ईर्ष्या, विराग या वैरभाव पोषण) प्रकट नहीं करना चाहिए। स्त्रियों की विशेष भाव से पूजा करनी चाहिए। यदि किसी स्थान पर कुलस्त्री का गमन, दर्शन, स्पर्शन् हो जाय तो उसे आहार प्रदान करके तथा स्वयं भी यथारुचि आहार ग्रहण करके साधक को मन्त्र जप करना चाहिए। वीराचार साधन के सभी कार्यों में स्वेच्छानियम का अवलम्बन करना चाहिए। स्वेच्छाचार ही वीरसाधन की पद्धति है—इसका अन्य कोई नियम नहीं है। किन्तु इस साधना में नारी ही (शक्ति ही) आराध्यदेवी, नारी ही प्राण एवं नारी ही साधक का आभूषण है— इसे सर्वदा स्मरण रखना चाहिए। १४—१६

सर्वदा कुलस्त्री सङ्गिनी के अन्यथा स्वस्त्री को सदा शक्तिरूपा में देखना चाहिए। इसे केवलमात्र तुम्हारे लिए सर्वस्व रूप से कहा है। यह विषय अन्यान्य समस्त तन्त्र में गुप्त है। १७

वीरसाधन पद्धति केवलमात्र तुम्हारे प्रति अत्यधिक स्नेह के कारण प्रकाशित किया है। किसी द्रव्य के भक्षण के समय उसे शक्ति को निवेदित करना चाहिए अथवा भक्ष्यद्रव्य का प्रथमभाग जल में निक्षेप करना चाहिए। इसके बाद साधक शक्तियुक्त होकर प्रान्तर प्रदेश अथवा श्मशान भूमि में जाकर द्रव्य भक्षण कर मन्त्र जप करेगा। जप समाप्त होने पर मैथुन में प्रवृत्त होना चाहिए। हे पार्वति ! सुनो। शुक्रोत्सारण के समय योनितत्त्व ग्रहण करके, यदि उसके द्वारा साधक तिलक प्रदान करे, तो शतजन्मार्ज्जित पाप भी तत्काल विनष्ट हो जाता है। १८—२१

१ जपेत् काल। २ नार्चनादौ; स्पर्शादिकेषुच। ३ एव विभूषणम्। ४ यदुक्तं तव सर्वस्वं; भवसर्वस्थे। ५ वीरसङ्गिविधानन्त। ६ मारभेत्। ७ कुरूते। ८ अपि जन्मार्ज्जितैः पापैस्तत्क्षणादेव मुच्यते।

प्रेतभूमेरभावे च शून्यालयगतेहपि च[1]।
तदभावे जपेन्मन्त्री[2] निच्छिद्र—गृहमध्यतः।। २२।।
प्राणान्ते च महेशानि न वदेत् पशुसन्निधौ।
वीरनिन्दा वृथा पानं वृथा मैथुनमेव च।। २३।।
वृथान्नं वर्ज्जयेन्मन्त्री वीरसाधनकर्म्मणि।
मद्यं[3] मांसं तथा मत्स्यं मुद्रां मैथुनमेव च ।। २४।।
पञ्चतत्त्वं बिना दुर्गे न वीरो जायते भुवि[4]।
तस्मात् भुक्त्वा च पीत्वा च जपेन्मन्त्री महामनुम्।। २५।।
अति[5] गुह्यतमं देवि वीराणां साधनं प्रिये।
किं द्रव्य-साधनैर्लक्षैः किं वीरसाधनै[6]-स्तथा।। २६।।
किं कोटिक्षतजपैश्च पुरश्चर्या-शतैस्तथा[7]।
किं तीर्थसेवनैर्लक्षैः किंवा तन्त्रादि-सेवनैः[8]।। २७।।
किं पूजा शतलक्षैश्च किं दानैस्तपसापि च[9]।
भगं बिना महेशानि सर्वश्चैव वृथा भवेत्।। २८।।
योनिपूजनमात्रेण सर्वसाधनभाग् भवेत्।
तर्पणं योनितत्त्वेन पितरः स्वर्गगामिनः।। २९।।

श्मशान तथा शून्यगृह में उसी भाव से जाकर कार्य करना चाहिए। उसी भाव से निःच्छिद्र गृह में वास करके कार्य करना चाहिए। २२

हे पार्वति ! प्राणान्त होने पर भी इस वीरसाधक पद्धति को पशुसाधक के समीप व्यक्त मत करना। वीरसाधना के लिए अकारण मद्यपान, वीर निन्दा, वृथा मैथुन एवं वृथा भोजन का सदा परिहार करना चाहिए। हे दुर्गे ! मद्य, मांस मत्स्य, मुद्रा एवं मैथुन इन पाँच तत्त्वों की उपेक्षा कर पृथ्वी पर कोई वीरसाधक नहीं हो सकता। अतएव इन पाँच तत्त्वों का भोग अथवा पान करके वीरसाधक महामन्त्र जप करने में प्रवृत्त होगा। २३—२५

हे देवि ! वीरगणों की साधन पद्धति अत्यन्त गोपनीय है। लाखों प्रकार के दिव्यसाधन एवं वीरसाधना का क्या फल है ? २६

शतकोटि जप अथवा पुरश्चरण का क्या फल है ? लाखों तीर्थसेवा अथवा तन्त्रादि सेवा का क्या फल ? शतलक्ष पूजा, दान या तपस्या आदि का क्या फल ? हे महेशानि ! आद्याशक्ति की पूजा के अतिरिक्त यह सब कार्य निष्फल हैं। केवलमात्र योनिपूजा द्वारा ही उक्त कार्य सफल एवं फलदायक होता है। स्वर्गवासी पितृगणों को भी योनितत्त्व द्वारा तर्पण करना चाहिए। २७—२९

---

१ शून्यालेय गतापि च। २ तदभावेन यजेन्मन्त्री। ३ मधु। ४ क्वचित्। ५ अस्ति। ६ किं दिव्यसाधनैः साधनैः; साधनस्तथा ७ शतैरपि। ८ तन्त्र निसेवनैः; किम्वा तन्त्र निषेवनैः। ९ दानस्तपसापि वा।

लालयेच्च सदा योनिं कुन्तला[1]-कर्षणादिना[2]।
क्रोड़े कृत्वा महायोनिं ताण्डवं कुरुते[3] यदि ।। ३०।।
तदां जन्मायुतै[4]: पापैमुक्ति:[5] कोटिकुलैः सह।
शिष्याणां[6] कन्यकायोनिं वधूयोनिं विशेषतः ।। ३१।।
केवलं गन्धपुष्पेण पूजयेद् भक्तिभावतः ।
इह लोके सुखं भुक्त्वा देवीलोके महीयते ।। ३२।।
अभावे गन्धपुष्पाभ्यां कारणेनापि पूजयेत् ।
पूजाकाले च देवेशि यदि कोऽप्यत्रागच्छेति[7] ।। ३३।।
दर्शयेद्वैष्णवीं पूजां[8] विष्णोर्न्यासं तथा स्तवम्।। ३४।।

इति योनितन्त्रे सप्तमः पटलः।। ७।।

कुन्तलाकर्षण प्रभृति कार्य द्वारा सर्वदा योनिका (शक्तिका) लालन करना चाहिए। महायोनि के कोड़ को ग्रहण करके यदि साधक ताण्डव नृत्य में प्रवृत्त हो, तो जन्मार्जित पापों का कोटिकुल के साथ मोक्षलाभ हो जाता है। विशेष भाव से शिष्याणी, कन्या तथा वधूयोनि का मात्र गन्धपुष्प द्वारा ही भक्तिभाव द्वारा पूजा करनी चाहिए। ऐसा करने से साधक इसलोक में सुखभोग करके मृत्योपरान्त देवीलोक में गमन करता है। ३०—३२

इन सभी स्थानों पर पूजा के लिए गन्धपुष्पादि का अभाव होने पर केवलमात्र कारण (सुरा) द्वारा पूजा सम्पन्न करना चाहिए। हे पार्वति ! यदि पूजा के समय पूजा स्थल पर कोई आ जाय, तो उसे वैष्णवी पूजा, विष्णुन्यास एवं विष्णुस्तव प्रदर्शन करना चाहिए (पाठान्तर में तत्पर्यानुसार –वैष्णवी मुद्रा)। ३३—३४

योनितन्त्र के सप्तम पटल का अनुवाद समाप्त।

---

१ कुन्तनं; कुन्तला २ वर्षणादिकं। ३ क्रियते। ४ जन्मार्जितैः। ५ मुक्ति स्तथा शुमं। ६ शिष्याणी। ७ यदि कोहत्र गच्छति। ८ दर्शयेत्। विष्णुन्यासं।

अष्टमः पटलः

श्रीमहादेव उवाच–

उर्वश्याद्याश्च[1] या नार्यः त्रिषु लोकेषु विद्यते[2]।
वीरसाधनकाले च तासां[3] नाथस्त कौलिकः[4] ।। १।।
मैथुनेन विना मुक्तिर्नेति शास्त्रस्य निर्णयः[5]।
श्रुति-स्मृति-पुराणानि कृतानि विविधं[6] मया ।। २।।
पशूनां बुद्धिनाशाय श्रणुष्व प्राणवल्लभे ।
परमानन्दरूपेण भजेत् योनिं सकुन्तलाम् ।। ३।।
विशेषतः कलियुगे योनिरूपां जगन्मयीम् ।
यो जपेत्[7] परया भक्त्या तस्य मुक्तिः करे स्थिता।। ४।।
साधकानां[8] सहस्राणि उपास्यानाञ्च[9] कोटिशः ।
तेषां भाग्यवशेनापि कालीसाधन तत्परः ।। ५।।

महादवे बोले–त्रिभुवन में उर्वशी प्रभृति जो नारियाँ हैं, वीरसाधनकाल के समय कौलिक (कुल अथवा वंशपरम्परागत कुलाचार अथवा कुलधर्म अनुष्ठानकारी) उन सबको नाथेगा। १

मैथुन के बिना मुक्तिलाभ नहीं होता, ऐसा शास्त्र का निर्णय है। हे प्राणबल्लभे ! सुनो। पशुसाधकों की बुद्धिनाश के लिए मैंने श्रुति–स्मृति–पुराण जैसे विविधशास्त्रों का प्रणयन किया है। परमानन्दरूपिणी शकुन्तला योनि की (शक्ति की) भजना करना चाहिए। विशेषतः कलयुग में योनिरूपा जगन्मयी आद्याशक्ति को जो व्यक्ति परमशक्ति के समान भजता है (स्वतंत्र पाठ–त्रय लिखित शब्द (Version) त्रय तात्पर्यार्थानुसार–जप करे उसकी मुक्ति करतलगत मानना चाहिए। २–४

सहस्रों साधकों अथवा कोटिसंख्यक तपस्वीगणों में कदाचित एक व्यक्ति भाग्यवश कालीसाधन के लिए तत्पर होता है। ५

---

१ उर्वश्यादि च। २ निश्चिते। ३ तस्या। ४ कौलिकाः। ५ निश्चयः। ६ कृतानि विविधा। ७ भजेत्। ८ साधनानां। ९ उपास्यानाञ्च।

कालीचजगतां माता सर्वशास्त्र-विनिश्चिता[1] ।
कालिका-स्मृतिमात्रेण सर्वपापैः प्रमुच्यते[2] ।। ६।।
सत्यं सत्यं पुनः सत्यं सत्यमेव सुनिश्चितम् ।
जप्त्वा महामनुं काल्याः कालीपुत्रो न संशयः।। ७।।
सा एव[3] त्रिपुरा[4] काली षोडशी भुवनेश्वरी ।
छिन्ना तारा महालक्ष्मी[5] र्मातङ्गी कमलात्मिका[6]।। ८।।
सुन्दरी भैरवी विद्या प्रकारान्यापि विद्यते[7] ।
दक्षिणा तारिणी सिद्धि नैंव चीनक्रमं विना ।। ९।।
यास्मिन मन्त्रे[8] यदाचारः स एव परमो मतः।
फलहानिस्त्वविश्वासात् तस्माद्भावपरो भवेत्[9]।। १०।।
यदत्र[10] लिखितं देवि तन्त्रे च योनिसंज्ञके[11] ।
तत् सर्वं साधकानाञ्च कर्त्तव्यं भावमिच्छता[12] ।। ११।।

कालीजगत की माता है। यह सभी शास्त्रों का सुनिश्चित सिद्धान्त है। काली का स्मरण करने मात्र से सभी पापों से मुक्ति हो जाती है। यह ध्रुवसत्य है। पुनः सत्य एवं सुनिश्चित सत्य है। कालीमन्त्र का जाप करने से साधक कालिकापुत्रतुल्य हो जाता है। इसमें कोई सन्देह नहीं। ६–७

जो काली है, वही त्रिपुरा, षोडशी, भुवनेश्वरी, तारा, महालक्ष्मी (महामाया), मातङ्गी, कमला, सुन्दरी, भैरवी प्रभृति विभिन्त विद्यारूपों में प्रकाशित हैं। चीनाचारक्रमोक्त पद्धति से भिन्न दक्षिणाकालिका भी तारा सिद्धिदायिनी नहीं होती। ८–९

जिस मन्त्र का जो रूप आचार विहित है वही उस मन्त्रसाधना की श्रेष्ठ पद्धति है। जो व्यक्ति इस विषय में विश्वास नहीं रखता उसको मन्त्रसिद्धि लाभ नहीं होता। अतएव सिद्धि अभिलाषा रखने वाले साधक को सर्वप्रयत्न भावपरायण [स्वतंत्र पाठ (version) — इस मर्मानुसार–भक्तिपरायण] होना चाहिए। १०

हे देवि ! इस योनितन्त्र में जो लिखा है, उसे भावपरायण होकर सिद्धि अभिलाषी साधक को अवश्य सम्पादन करना चाहिए। ११

---

१ सर्वशास्त्रे विनिर्मिता। २ तस्या स्मरणमात्रेण भवपाशैर्न बद्ध्यते। कालीस्मरणामात्रेण भवपाशैर्न बद्ध्यते। कालिकास्मृतिमात्रेण भवपाशैर्न बद्ध्यते कालीस्मरणमात्रेण भवपाशे न बध्यते। ३ जा एव। यत्र वात्र। पत्र वा। ४ त्रिपुरादेवी। ५ महामाया। ६ महातारा महालक्ष्मीः कमला अम्बिका तथा। ७ प्रकाराण्या प्रवर्त्तते। ८ मन्त्रे सदाचारः। ९ तस्माद्भक्ति परायणः। १० यत्र यत्र; शास्त्र। ११ योनिसङ्गमे; सिद्धये। १२ तत् सर्वं साधनानाञ्च कर्त्तत्यात् भवनिश्चिता।

जिह्वा योनिमुखं[1] योनिः योनिः श्रोत्रे च चक्षुषि ।
सर्वत्रापि महेशानि योनिचक्रं विभावयेत् ।। १२।।
योनिं विना महेशानि सर्वपूजा वृथा भवेत्[2] ।
तथा मन्त्राः न सिद्ध्यन्ति सत्यं सत्यं वदाम्यहम्।। १३।।
सर्वां पूजां परित्यज्य योनिपूजां समाचरेत् ।
गुरुं विना महेशानि मद्भक्तो नापि सिद्ध्यते[3] ।। १४।।

ॐ योनिपीठाय नमः।।

इति योनितन्त्रे अष्टमः पटलः।। ८।।

समाप्तोहयं ग्रन्थः।

साधक अपनी जिह्व, मुख [स्वतन्त्र पाठ (Version) – इसके तात्पर्यानुसार–मन] चक्षु एवं कान प्रभृति समस्त इन्द्रियों द्वारा योनि का ध्यान करेगा। हे पार्वती ! योनिपूजा के अतिरिक्त अन्य सभी प्रकार की पूजा निष्फल है। मैं सत्य वचन कहता हूँ कि योनिपूजा से भिन्न मन्त्र भी सिद्ध नहीं होता। अतएव अन्य समस्त पूजा का परित्याग करके योनिपूजा (शक्तिपूजा) सम्पन्न करना चाहिए। हे .....पार्वति !

इस साधना में गुरुपदेश के बिना मेरा भक्त भी सिद्धिलाभ नहीं कर सकता। १२–१४

ॐ योनिपीठाय नमः।

योनितन्त्र के अष्टम पटल का अनुवाद समाप्त।

---

१ मनोयोनि; तस्माद्भावपरो भव। २ मद्भक्तो न च सिद्ध्यति इति पाठः क्वचित्। ३ यथो मन्त्रो न सिद्ध्यति।

।। ग्रन्थ समाप्त ।।

योनिध्यानम्

अतिसुललितगात्रां हास्यवक्त्रां त्रिनेत्रां,
जितजलदसुकान्तिं पट्टवस्त्रप्रकाशाम् ।
अभयवरकराढयां रत्नभूषातिभव्यां,
सुरतरुतलपीठे रत्नसिंहासनस्थाम् ।।
हरिहरविधिवन्द्यां बुद्धिशुद्धिस्वरूपां,
मदनरससमाक्तां कामिनीं कामदात्रीम्।
निखिलजनविलासोद्दामरूपां भवानीं,
कलिकलुषनिहन्त्रीं योनिरूपां भजामि ।।

इति योनिं ध्यात्वा सम्पूज्य योन्युपीर ह्सौः इति योनिमन्त्रमष्टोत्तरशतं जप्त्वा जपं समर्प्य स्तवकवचादिकं पठेत्।

योनिस्तोत्रम्

श्रीदेव्युवाच–

भगवान सर्वधर्मज्ञ कुलशास्त्रार्थपारग।
सर्वं में कथितं नाथ न त्वेकं परमेश्वर।।
श्रीयोनेः स्तवराजं हि तथा कवचमुत्तमम्।
श्रोतुमिच्छामि सर्वज्ञ यदि तेऽस्ति कृपा मयि।।
सारभूतं महादेव निगमान्तर्गतं हर।
यदि न कथ्यते देव प्राणत्यागं करोम्यहम।।

दिवानिशि महाभाग ममाश्रुः पतितं भवेत्।
अतस्तद् देवदेवेश कथ्यतां मे दयानिधे।।

श्रीमहादेव उवाच–

श्रृणु पार्वति वक्ष्यामि देहत्यागं कथं कुरु।
अत्यन्तगोपनीयं हि निगमे कथितं पुरा।।
ब्रह्मविष्णुग्रहादीनां न मया कथितं पुरा।
अकथ्यं परमेशानि इदानीं किं करोमि ते।।
तव स्नेहेन बद्धोऽहं कथयामि तव प्रिये।
मातर्देवि महाभागे यदि कस्मै प्रकाश्यते।
शपथं कुरु मे दुर्गे यदि त्वं मत्प्रिया स्मृता।।
ब्रह्मा यदि चतुर्वक्त्रैः पञ्चवक्त्रैः सदाशिवः।
वर्णितुं स्तवराजञ्च न शक्नोति कथंचन।
सम्यग् वक्तुं न शक्नोमि संक्षेपात् कथयामि ते।।

अस्य श्रीयोनिस्तवराजस्य कुलाचार्य-ऋषिः कौलिकच्छन्दः।
श्रीयोनिरूपा दशविद्यात्मिका देवता सर्वसाधने विनियोगः।

ॐ योनिरूपे महामाये सर्व्वसम्पतप्रदे शुभे।
कृपया सर्व्वसिद्धिं मे देहि देवि ! जगन्मयि।। १।।
सर्वस्वरूपे सर्वेशे सर्वशक्ति समन्विते।
कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि ! ।। २।।
महाघोरे महाकालि ! कुलाचारप्रिसे सदा।
कृपया सर्वसिद्धिं मे देहि देवि ! जगन्मयि!।। ३।।
घोरदंष्ट्रे चोग्रतारे सर्वशत्रुविनाशिनि !।
कृपया सर्वसिद्धिं में देहि देवि जगन्मयि।। ४।।
योनिरूपा महाविद्ये सर्वदा मोक्षदायिनी।
कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि।। ५।।

जगद्धात्रि महाविद्ये जगदुद्धारकारिणि।
कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि।। ६।।
जगद्धात्रि महामाये योनिरूपे सनातनि।
कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि।। ७।।
जय देवि जगन्मातः सृष्टि स्थित्यन्तकारिणी।
कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि।। ८।।
सिद्धिदात्रि महामाये सर्वसिद्धिप्रदायिनि।
कृपया सर्वसिद्धिं में देहि देवि जगन्मयि।। ९।।
महालक्ष्मि महादेवि महामोक्षप्रदायिनि।
कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि।। १०।।
गौरी लक्ष्मीश्च मातङ्गी दुर्गा च नववण्डिका।
वगलामुखी भुवनेशी भैरवी च तथा प्रिये।
छिन्नमस्ता च काली च योनिरूपा सनातनी।
कृपया सर्वसिद्धिं मे देहि देवि जगन्मयि।। ११।।
काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी।
नायिका विप्रचित्ताद्या अन्या या नायिका स्मृताः।
वसन्ति योनिमाश्रित्य ताभ्योऽपीह नमो नमः।। १२।।
अणिमाद्यष्टसिद्धिश्च वसत्यस्याः समीपतः।
नमस्तेऽस्तु नमस्तेऽस्तु योगमोक्ष-प्रदायिनि।। १३।।
सर्वशक्तिमये देवि सर्वकल्मषनाशिनि।
हे योने हर विघ्नं मे सर्वसिद्धिं प्रयच्छ मे।। १४।।
आधारभूते सर्व्वेषां पूजकानां प्रियम्वदे।
स्वर्गपाताल वासिन्यै योनये च नमो नमः।। १५।।
विष्णुसिद्धिप्रदे देवि शिवसिद्धि प्रदायिनी।
ब्रह्मसिद्धिप्रदे देवि रामचन्द्रस्य सिद्धिये।
शक्रादीनाञ्च सर्वेषां सिद्धिदायै नमो नमः।। १६।।

इति ते कथितं देवि सर्वसिद्धि प्रदायकम्।
स्तोत्रं योनेर्न्महेशानि प्रकाशयामि ते प्रिये।।
सर्वसिद्धिप्रदं स्तोत्रं यः पठेत् कौलिकः प्रिये।
लिखित्वा पुस्तके देवि रक्तद्रव्यैश्च सुन्दरि।।
तस्यासाध्यानि कर्म्माणि वश्यादीनि कुलेश्वरि।
नास्ति नास्ति पुनर्नास्ति नास्त्येव भुवनत्रये।
यः पठेत् प्रातरुत्थाय गाणपत्यं लभेन्नरः।।
रात्रौ कान्तासमागेगे यः पठेत् साधकोत्तमः।
स्तवेनानेन संस्तुत्य साधकः किं न साधयेत्।।
सालङ्कृतां स्वकान्ताश्च लीलाहावविभूषिताम्।
रक्त वस्त्र परीधानां कृत्वा संपूज्य साधकः।
भोजयित्वा ततो देवि स्वयं भुञीत तत्परः।।
मत्स्यमांसादिकान् भुक्त्वा क्रोड़े कृत्वा स्वयोषितम्।
रात्रौ यदि जपेन्मन्त्रं सा दुर्गा स सदाशिवः।
भवत्येव न सन्देहो मम वक्त्राद्विनिर्गतम्।।
येन दत्तं मयि स्तोत्रं स एव मद्गुरुः स्मृतेः।
तस्यैव यदि भक्तिः स्यात् स भवेञगदीश्वरः।।
नमोऽस्तु स्तवराजाय नमः स्तवप्रकाशिने।
यत्रास्ते स्तवराजोऽयं तत्रास्ते श्रीसदाशिवः।।
इति शक्तिकागमसर्वस्वे हरपार्वतीसंवादे
श्रीयोनिस्तवराजः समाप्तः।

योनिस्तोत्रम्

प्रकारान्तरम्

शृणु देवि सुर-श्रेष्ठे सुरासुर- नमस्कृते।
इदानीं श्रोतुमिच्छामि स्तोत्रं हि सर्वदुर्लभम्।
यस्या व वोधनाद्देहे देही ब्रह्म-मयो भवेत्।। १।।

श्री पार्वत्युवाच—

शृणु देव सुरश्रेष्ठ सर्व-बीजस्य सम्मतम्।
न वक्तव्यं कदाचित्तु पाषण्डे नास्तिके नरे।। २।।
ममैव प्राण-सर्वस्वं लतास्तोत्रं दिगम्बर ।
अस्य प्रपठनाद्देव जीवन्मुक्तोऽपि जायते।। ३।।
ॐ भग-रूपा जगन्माता सृष्टि-स्थिति-लयान्विता।
दशविद्या-स्वरूपात्मा योनिर्मां पातु सर्वदा।।४।।
कोण-त्रय-युता देवि स्तुति-निन्दा-विवर्जिता।
जगदानन्द-सम्भूता योनिर्मां पातु सर्वदा।। ५।।
रक्त रूपा जगन्माता योनिमध्ये सदा स्थिता।
ब्रह्म-विष्णु-शिव-प्राणा योनिर्मां पातु सर्वदा।। ६।।
कार्त्रिकी-कुन्तलं रूपं योन्युपरि सुशोभितम्।
भुक्ति-मुक्ति-प्रदा योनिः योनिर्मां पातु सर्वदा।। ७।।
वीर्यरूपा शैलपुत्री मध्यस्थाने विराजिता।
ब्रह्म-विष्णु-शिव श्रेष्ठा[1] योनिर्मां पातु सर्वदा।। ८।।
योनिमध्ये महाकाली छिद्ररूपा सुशोभना।
सुखदा मदनागारा योनिर्मां पातु सर्वदा।। ९।।
काल्यादि-योगिनी-देवी योनिकोणेषु संस्थिता।
मनोहरा दुःख लभ्या योनिर्मां पातु सर्वदा।। १०।।

---

१ प्राणा।

सदा शिवो मेरु-रूपो योनिमध्ये वसेत् सदा।
कैवल्यदा काममुक्ता[1] योनिर्मां पातु सर्वदा।। ११।।
सर्व-देव स्तुता[2] योनिः सर्व-देव-प्रपूजिता।
सर्व-प्रसवकर्त्री त्वं योनिर्मां पातु सर्वदा।। १२।।
सर्व-तीर्थ-मयी योनिः सर्व-पाप प्रणाशिनी।
सर्वगेहे[3] स्थिता योनिः योनिर्मां पातु सर्वदा।। १३।।
मुक्तिदा[4] धनदा देवी सुखदा कीर्तिदा तथा।
आरोग्यदा वीर-रता पञ्च-तत्त्व-युता सदा[5]।। १४।।
योनिस्तोत्रमिदं प्रोक्तं यः पठेत् योनि-सन्निधौ।
शक्तिरूपा महादेवी तस्य गेहे सदा स्थिता।। १५।।
तीर्थ पर्यटनं नास्ति नास्ति पूजादि-तर्पणम्।
पुरश्चरणं[6] नास्त्येव तस्य मुक्तिरखण्डिता।। १६।।
केवलं मैथुनेनैव शिव-तुल्यो न संशयः।
सत्यं सत्यं पुनः सत्यं मम वाक्यं वृथा नहि।। १७।।
यदि मिथ्या मया प्रोक्ता तव हत्या-सुपातकी।
कृताञ्जलि-पुटो भूत्वा पठेत् स्तोत्रं दिगम्बर !।। १८।।
सर्वतीर्थेषु यत् पुण्यं लभते च स साधकः।
काल्यादि-दश विद्याश्च गङ्गादि-तीर्थ-कोटयः।
योनि-दर्शन-मात्रेण सर्वाः साक्षान्न संशय।। १९।।
कुल-संभव-पूजायामादौ चान्ते पठेदिदम्।
अन्यथा पूजनाद्देव रमणं मरणं भवेत्।। २०।।
एकसन्ध्यां त्रिसंध्यां वा पठेत् स्तोत्रमनन्यधीः।
निशायां सम्मुखे शक्त्याः स शिवो नात्र संशयः।। २१।।
इति निगमकल्पद्रुमे योनि स्तोत्रं समाप्तम्।।

---

१ रता। २ युता। ३ देहे। ४ भुक्तिद। ५ प्रदा। ६ पुरश्चर्यापि।

योनिकवचम्

देव्युवाचा–

भगवन् श्रोतुमिच्छामि कवचं परमाद्भुतम्।
इदानीं देवदेवेश कवचं सर्वसिद्धिदम्।।

महादेव उवाच–

शृणु पार्वति ! वक्ष्यामि अतिगुह्यतमं प्रिये।
यस्मै कस्मै न दातव्यं दातव्यं निष्फलं भवेत्।।
अस्य श्रीयोनिकवचस्य गुप्तऋषिः कुलटाच्छेन्दा
राजविघ्नो त्पातविनाशे विनियोगः।
ह्रीं योनिर्न्मे सदा पातु स्वाहा विघ्नविनाशिनी।
शत्रुनाशात्मिका योनिः सदा मां रक्ष सागरे।।
ब्रह्मात्मिका महायोनिः सर्वान् प्ररक्षतु।
राजद्वारे महाघोरे क्रीं योनिः सर्वदावतु।।
हुमात्मिका सदा देवी योनिरूपा जगन्मयी।
सर्वाङ्गं रक्ष मां नित्यं सभायां राजवेश्मनि।।
वेदात्मिका सदा योनिर्वेदरूपा सरस्वती।
कीर्त्तिं श्रीं कान्तिमारोग्यं पुत्रपौत्रादिकं तथा।।

रक्ष रक्ष महायोने सर्वासिद्धि प्रदायिनी।
राजयोगात्मिका योनिः सर्वत्र मां सदावतु।।
इति ते कथितं देवि कवचं सर्वासिद्धिदम्।
त्रिसन्ध्यं यः पठेन्नित्यं राजोपद्रवनाशकृत्।।
सभायां वाक्पतिश्चैव राजवेश्मनि राजवत्।
सर्वत्र जयमाप्नोति कवचस्य जपेन हि।।
श्रीयोन्याः सङ्गमे देवीं पठेदेनमनन्यधीः।
स एव सर्वसिद्धीशो नात्र कार्या विचारणा।।
मातृकाक्षरसंपुटं कृत्वा यदि पठेन्नरः।
भुङ्क्ते च विपुलान् भोगान् दुर्गया सह मोदते।।
इति गुह्यतमं देवि सर्वधर्म्मोत्तमोत्तमम्।
भूर्जे वा ताड़पत्रे वा लिखित्वा धारयेद् यदि।।
हरिचन्दनमिश्रेण रोचना-कुङ्कमेन च।
शिरवायामथवा कण्ठे सोऽपीश्वरो न संशयः।।
शरत्काले महाष्टम्यां नवम्यां कुलसुन्दरि।
पूजाकाले पठेदेनं जयी नित्यं न संशयः।।
इति शक्ति कागमसर्वस्वे हरगौरीसंवादे
श्रीयोनिकवचं समाप्तम्।

कुण्डलिनीस्तोत्रम्

श्रीशिव उवाच—

ॐ तडित्कोटिप्रभदीप्ति-चन्द्रकोटि सुशीतलाम्
सार्द्धत्रिवलयाकार- स्वयम्भूलिङ्गवेष्टिताम्।। १।।
उत्थापयेन्महादेवीं महारक्तां मनोन्मनीम्।
श्वासोच्छ्रासादुद्गच्छन्तीं द्वादशाङ्गुलरूपिणीम्।। २।।
योगिनीं खेचरीं वायुरूपां मूलाम्बुजस्थिताम्।
चातुर्वर्णस्वरूपां तां वकारादि- समस्तकाम्।। ३।।
कोटि कोटि- सहस्रार्क-किरणोज्ज्वलमोहिनीम्।
महासूक्ष्मपथप्रान्त-रान्तरान्तर-गामिनीम्।। ४।।
त्रैलोक्यरक्षितां वाक्य-देवताशब्दरूपिणीम्।
महाबुद्धिप्रदां देवीं सहस्रदलगामिनीम्।। ५।।
महासूक्ष्मपथे तेजोमयीं सत्यस्वरूपिणीम्।
कालरूपां ब्रह्मरूपां सर्वत्र सर्वविन्मयीम्।। ६।।
जन्मोद्धारिणी रक्षिणीह तरुणी वेदादिबीजादिना
नित्यं चेतसि भाव्यते भुवि कदा मद्वाक्यसञ्चारिणी।
मां पातु प्रियदा सदा सविपदं संख्यातय श्रीधरे
धात्री त्वं स्वयमादिदेववनिता दीनातिदीनं परम्।। ७।।
रक्ताभामृत चन्द्रिका लिपिमयी सर्पाकृतिर्निंद्रिता
जग्रद्धर्म-समाश्रिता भगवती त्वं त्रांशलोकाश्रया।
मांसोद्गन्धक-दोषजालजड़ितं वेदादिकार्यान्वितं
संपाल्यामल - कोटिचन्द्रकिरणे नित्यं शरीरं कुरु।। ८।।

सिध्यर्थी निजदोषवित् खलगति-व्याधीयते विद्यमा
कुण्डला कुलमार्गयुक्तनगरी सायाह्नमाज्ञाश्रया।
यद्येवं भजति प्रभात समये मध्याह्नकालेऽथवा
नित्यं यः कुलकुण्डली-निजपदाम्भोजं स सिद्धो
भवेत्।। ६।।

यो वाकाश्चतुर्दलेऽतिविमले वाञ्छाफलोन्मूलके
नित्यं सम्भ्रति नित्यदेशघटिता सङ्केतिता भाविता।
विद्या कुन्तलमालिनी स्वजननी सारक्रिया भाव्येत,
यै-स्तैः सिद्धकुलोद्भवैः प्रणतिभिः कीर्त्या परं
शम्भूभिः।। १०।।

वाचा शङ्करमोहिनी त्रिवलयाच्छायापटोद्गामिनी
संसारादिमहासुखप्रहननी नेत्रस्थिता योगिनी।
सर्वाग्रन्थिविनोदिनी सुभुजगा सूक्ष्मातिसूक्ष्मा परा
ब्रह्मज्ञानबिनोदिनी कुलकुठाराघातिनी भाव्यते।। ११।।

वन्देश्रीकुलकुण्डलीं त्रिवलिभिः सार्द्धं स्वयम्भूप्रियां
प्रवेष्टयासुरसारचित्तचपला वाला वला निष्फला।
या देवी परिभाति वेदबदना सम्भावना भावना
तामिष्टां शिरसि स्वयम्भुवनितां सम्भावयामि
क्रियाम्।। १२।।

वाणी कोटिमृदङ्गनादनदना निःश्रेणिकोटिध्वनिः
प्राणेशी रसधाममूलक मलोल्लासैकपूर्णानना।
आषाढ़ोद्भवमेघराजनियुतध्वान्तान्तरस्थायिनी
माता सा परिपातु सूक्ष्मपथगे मां योगिनं
शङ्करु।। १३।।

त्वामाश्रित्य नराव्रजन्ति सहसा बैकुण्ठकैलासयो-
रानन्दैक विलासिनीं शशिपदानन्दाननाकारिणीम्।
मातः श्रीकुलकुण्डलि प्रियकले काले कुलोद्दीपने
भूतस्थां प्रणमामि रुद्रवनितां मामुद्धरत्वं
पथि।। १४।।

कुण्डलीशक्तिमार्गस्थं स्तोत्राष्टकं महाफलम्।
यः पठेत् प्रातरुत्थाय स योगी भवति
ध्रुवम्।। १५।।

क्षणादेव हि पाठेन कविनाथो भवेदिह।
परत्र कुण्डलीयोगाद् ब्रह्मलीनो भवेन्महान्।। १६।।

इति ते कथितं नाथ कुण्डलीकोमलस्तवम्।
एतत्स्तोत्र प्रसादेन देवेषु गीष्पतिगुर्रुः ।। १७।।

सर्वे देवाः सिद्धियुक्ता अस्याः स्तोत्रप्रसादतः।
द्वापरार्द्धचिरंजीवी ब्रह्मा सर्वसुरेश्वः।। १८।।

त्वय्यापि मम सन्निध्ये स्थितो भगवतीपतिः।
मां बिद्धि परमां शक्तिं स्थूलसूक्ष्मस्वरूपिणीम्।। १९।।

सर्वप्रकाशकरणीं विन्ध्यपर्वतवासिनीम्।
हिमालयसुतां सिद्धां सिद्धमन्त्रस्वरूपिणीम्।। २०।।

वेदान्तशक्तितन्त्रस्थां कुलतन्त्रार्थगामिनीम्।
रुद्रयामलमध्यस्थां स्थितिस्थायक भावनाम्।। २१।।

पञ्चमुद्रास्वरूपाञ्च शक्तियामलमलिनीम्।
रत्नमालावलाकाढ्यां चन्द्रसूर्यप्रकाशिनीम्।। २२।।

सर्वभूतमहाबुद्धीदायिनीं दानवापहाम्।
स्थित्युत्पत्तिलयकरीं करुणासागरस्थिताम्।। २३।।
महामोहनिवासाढ्यां दामोदरशरीरगाम्।
छत्रचामररत्नाढ्यांमहाशलकरां पराम्।। २४।।
ज्ञानदां बुद्धिदां विद्यां रत्नमालाकलापदाम्।
सर्वतेजः स्वरूपां मामनन्त कोटि विग्रहाम्।। २५।।
दरिद्र धनदां लक्ष्मीं नारायणमनोरमाम्।
सदा भावय शम्भो त्वं योगनायकपण्डित।। २६।।
इति श्रीरुद्रयामले उत्तरखण्डे कुण्डलिनीस्तोत्रं समाप्तम्।

प्रकीर्णांशः

अथ योनिमुद्रालक्षणम्, तदुक्तं-यन्त्रमन्त्रावल्याम्।

देव्युवाच–

योनिमुद्रा च कथिता यत्नेता न प्रकाशिता।
साम्प्रतं श्रोतुमिच्छामि मुद्रायाश्चैव लक्षणम्।।
योनिमुद्रा च किं नाम फलं तस्याश्च किं प्रभो[1]।
विधानं किं स्वरूपञ्च कथयस्व जगत् प्रभो !।।

श्री शिव उवाच–

शृणु देवि ! महाभागे ! मुद्रां ज्ञानस्वरूपिणीम्।
यां ज्ञात्वा साधकाः सर्वे ज्ञानपीयूषसागरे।।
निमज्जन्ति कुलैः सार्द्धं सकृदभ्यासमात्रतः।।
षण्णवत्यङ्गुलायामं शवीरमुभयात्मकम्।।
गुद-ध्वजान्तरे कन्दमुत्सेधाद् द्वयङ्गुलं प्रिये !।
तस्य द्विगुणविस्तारं वृत्तरूपेण शोभितम्।।
नाड्यस्तत्र समुत्पन्ना मुख्यास्तिस्तस्तु भाविनि !।
इड़ा वामे स्थिता नाड़ी पिङ्गला दक्षिणे स्थिता।।
तयोर्मध्यगता नाड़ी सुषुम्ना वंशमाश्रिता[2]।
पादाङ्गुष्ठद्वयं याता शिखाम्यां शिरसा पुनाः।।
ब्रह्मस्थानं समापन्ना सोमसूर्याग्निरूपिणी।
तस्या मध्यगता नाड़ी चित्राख्या योगिवल्लभा।
ब्रह्मरन्ध्रं विदुस्तस्यां[3] पद्मसूत्रनिभं परम्।
आधारांश्च विदुस्तत्र मतभेदादनेकधा।।
दिवामार्गमिदम् प्राहुरमृतानन्दकारणम्।
इड़ायां सञ्चरेच्चन्द्रः पिङ्गलायां दिवाकरः।।

---

१ कीदृशम्। २ पृष्ठवंशगा। ३ तन्त्र।

ज्ञातौ योगनिदानज्ञैः सुषुम्नायाश्च तावुभौ[1]।
आधारकन्दमध्यस्थं त्रिकोणमतिसुन्दरम्।।
त्रिकोणमध्ये देवेशि ! कामबीजञ्च सुन्दरम्।
कामबीजोद्भवन्तत्र स्वयम्भूलिङ्गमुत्तमम्।।
तत्र विद्युल्लताकारा कुण्डली परदेवता।
परिस्फुरति सर्वात्मा सुप्ताहि-सदृशाकृतिः।।
विभर्ति कुण्डलीशक्तिरात्मानं हंसमाश्रिता।
हंसः प्राणाश्रयो नित्यं प्राणा नाड़ी-समाश्रयाः।।
आधारादुद्गतो वायुर्यथावत् सर्वदेहिनाम्।
देहं व्याप्य स्वनाड़ीभिः प्रयाणं कुरुते वहिः।।
द्वादशाङ्गुलमानेन तस्मात् प्राणः समीरितः।
रम्ये मृद्वासने शुद्धे पटाजिनकुशोत्तरे।।
बद्धवैकमासनं योगी योगमार्गपरो भवेत्।
इड़याकर्षये द्वायुं वाह्यं तयैव मुद्रया।।
धारयेत् पूरितं तेन उभाभ्यां कुम्भकेन च।
नाड़्या पिङ्गलया चैनं रेचयेच्च शनैः शनैः।।
भूयो भूयः क्रमात्तस्य प्रभ्यासेन समाचरेत्।
एवमभ्यस्यतः पुंसो देहे स्वेदोद्गमोऽधमः।।
मध्यम ..... कम्पनं युक्ता भूमिदेशात् परो मतः।
एवं क्रमेण नाड़ीनां शोधनं कल्पयेद्बुधः।।
ततो गुह्ये वामपार्ष्णिं हे देवि ! विनिवेशयेत्।
तस्योपरि महादेवि ! दक्षपार्ष्णिं निवेशयेत्।।
ऋजुकायाशिरोग्रीवः काकचञ्चुपुटेन च।
आकारेण बहिर्वायुं जाठरं परिपूरयेत्।।
अङ्गुलीभिर्दृढ़ं बद्धा कारणानि समाहितः।
अङ्गुष्ठाभ्यामुभे श्रोते तर्जनीभ्यां विलोचने।।

---

१ शृणु सर्वे विधानञ्च सुषुम्नायाश्च तावुभौ।

नासारन्ध्रे च मध्याभ्यामन्याभिर्वदनं दृढ़म्।
बद्धात्मप्राणमनसामेकत्वं समनुस्मरन्।।
धारयेन्मारुतं सम्यक् योगोऽयं योगिवल्लभः।
नादः स जायते सम्यक् क्रमादभ्यस्यतः शनैः।।
मत्त-भृङ्गावली-गीत-सदृशं प्रथमो ध्वनिः।
वंशीकांस्यानिलापूर्ण- वंशध्वनिनिभोऽपरः।।
घण्टारवसमः पश्चात् घनमेघस्वनोऽपरः।
प्रसुप्त-भुजगाकारां कुण्डलीं पवदेवताम्।।
सुषुम्नामुखमाविश्यावेष्ठितां परिचिन्तयेत्।
कन्दावस्थित-योन्यान्तु क्रमन्तं रक्तवर्णकम्।।
कामं शिवस्वरूपञ्च चिन्तयेत् साधकोत्तमः।
तस्योपरि पुनर्ध्यायेत् चित्कलां हंसमाश्रिताम्।।
प्रदीपकलिकाकारां कुण्डल्याभेदरूपिणीम्।
चित्कलया कुण्डलिनीं तेजोरूपां जगन्मयीम्।।
हंसेन च महादेवी ब्रह्मरन्ध्रं नयेत् सुधीः।
षट्चक्र-सन्धि-मार्गेण सुषुम्ना-वर्त्मना तथा।।
ऊद्र्ध्वं नयेत् कुण्डलिनीं जीवात्म-सहिंता पराम्।
आधारोस्थित-मारुतान् ब्रह्मरन्ध्रे शनैःशनैः।।
तेनैव मरुता देवि ! पद्मान्यूर्ध्व मुखानि च ।
मारयेत् साधको योगी ज्ञानमात्रेण चेतसा।।
आधारकन्दे पद्मं वै वेदपत्रं सुशोभनम्।
स्वाधिष्ठाने लिङ्गमूले षड्दलं परिचिन्तयेत्।।
मणिपूरे नाभिदेशे दिग्दलं सुरसुन्दरि !।
अनाहते हृदि ध्यायेत् द्वादशारं सुलक्षणम्।।
विशुद्धाख्ये महाचक्रे षोडशच्छदपङ्कजम्।

भ्रुवोर्मध्ये महापद्ममाज्ञाख्ये द्विदलं तथा।।
आधारदीनि चक्राणि भित्वा तेजः-स्वरूपिणीम्।
ब्रह्मरन्ध्रे नयेदेनां कुण्डलीं परदेवताम्।।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः।
परमात्मा शिवश्चैव षट्शिवाः परिकीर्त्तिताः।।
डाकिनी लाकिनी चैव राकिणी शाकिनी तथा।
काकिनी हाकिनी चैव एताः षट्चक्रदेवताः।।
एतानि उह्य षट्चक्रे ब्रह्मत्वेन सुरेश्वरि !।
ब्रह्मरन्ध्रे सहस्रारे कुण्डलीं स्थापयेद्बुधः।।
परमात्मा शिवश्चैव ब्रह्मपद्मस्थितः प्रभुः।
कुण्डली शक्तिरूपा च परमात्मा शिवः स्वयम्।।
वैष्णवस्य च शैवस्य शाक्तस्य च वरानने !।
शिवशक्त्योः समायोगात् महाप्रज्ञा प्रजायते।।
पृथिव्यादीनि भूतानि वीरभावेण निलयेत्।
तत्रैव परमेशानि चन्द्रमण्डलमेव च।।
अमृतस्य परं स्थानं ज्ञानपीयूष-सागरम्।
तस्माद्विनिर्गतां .....
तत्संसर्गाच्च चक्राणि तेजोरूपाणि .....।
सहस्रारे महापद्मे चामृतं विनिवेशयेत्।।
तेनामृतेन संप्लाव्य कुण्डली परदेवताम्।
तेनैव वर्त्मना देवीं स्वस्थानमानयेत् पुनः।।
सोऽहमित्यात्मनात्मानं भावयेत् साधकोत्तमः।
षट्चक्र देवतायास्तु लोली भूतामृतेन च।।
चिन्तयित्वा महापद्मे स्वस्वस्थाने निवेशयेत्।
ततस्तु चित्रिणीनाड्यामक्षमालां विभावयेत्।।

125-72

पञ्चाशन्मातृकारूपा मातृका सा सरस्वती।
अकारादि-क्षकारान्ता अक्षमाला प्रकीर्त्तिता।।
क्षकारं मेरुरूपन्तु लंघयेन्न कदाचन।
अनुलोमविलोमस्थ - क्षिप्तया वर्णमालया।।
आदि-लान्त-लादि आन्त-क्रमेण परमेश्वरि !।
अष्टोत्तरशतं मूल-मंत्र ज्ञानेन संजयेत्।।
मनसा चेन्मनुं जप्त्वा मंत्र- सिद्धो भवेद् ध्रुवम्।
अष्टोत्तर-शते जापे आदौ ल्कीवं समुच्चरेत्।।
.....रूपेणैव पुनः ल्कीवं.....
वर्णानामष्टवर्गेण अष्टवर्गं जपेत् सुधीः।
अकचटतपयशाः इत्येवं चाष्टवर्गतः।।
अनया मुद्रया देवि ! छिन्नादिदोष-शान्तये।
मासमेकं जपेन्मन्त्री हविष्याशी जितेन्द्रियः।।
मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः।
शतकोटि-जपेनापि तस्य सिद्धिर्न जायते।।
योनिमुद्रा शक्तिरूपा यत्र नास्ति महेश्वरि।
.....पूजाहोमादिकञ्च यत्।।
शक्तिहीनं गुहं प्राप्य शक्तिः शिष्ये कृतः प्रिये।
मूलछिन्ने द्रुमे ! कुतः पुष्पफलादिकम्।
मनोऽन्यत्र शिवोऽन्यत्र शक्तिरन्यत्र मारुतः।।
न सिध्यन्ति वरारोहे ! कल्पकोटिजपादपि।
योनिमुद्रा महामुद्रा ज्ञातव्या यत्नतः सदा।।

इति यन्त्रमन्त्रावल्यां योनिमुद्रा-लक्षणं समाप्तम्

हमारे महत्त्वपूर्ण प्रकाशन

1. मन्त्र महोदधि (मूल एवं हिन्दी अनुवाद) मूल्य : 350/-
2. हिन्दी मन्त्रमहार्णव (मूल एवं हिन्दी अनुवाद)
   मूल्य : देवी खण्ड 350/-, मूल्य : देवता खण्ड 350/-, मूल्य : मिश्र खण्ड 200/-
3. कुलार्णव तन्त्र (मूल एवं अंग्रेजी अनुवाद) मूल्य : 200/-
4. सप्तशतीसर्वस्वम् (नानाविधिसप्तशतीरहस्यसंग्रहः)
   पण्डितसरयू प्रसादेन संगृहीतः मूल्य : 100/-
5. शिवस्वरोदय (मूल एवं अंग्रेजी अनुवाद सहित) मूल्य : 75/-
6. वामकेश्वरीमतम् (मूल एवं अंग्रेजी अनुवाद सहित) मूल्य : 50/-
7. कौलज्ञाननिर्णय (मूल एवं अंग्रेजी अनुवाद सहित) मूल्य : 100/-
8. डामर तंत्र (मूल एवं अंग्रेजी अनुवाद) मूल्य : 50/-
9. डामर तंत्र (मूल एवं हिन्दी अनुवाद) मूल्य : 35/-
10. मन्त्र रामायण (मूल एवं हिन्दी अनुवाद) मूल्य : 30/-
11. कामरत्नतंत्रम् (मूल एवं हिन्दी अनुवाद) मूल्य : 60/-
12. अद्‌भुत रामायण (महर्षि वाल्मीकि कृत) मूल्य : 50/-
13. भूत डामर तंत्र (मूल एवं हिन्दी अनुवाद) मूल्य : 40/-
14. शाक्तानन्दतरङ्गिणी (मूल एवं हिन्दी अनुवाद) मूल्य : 100/-
15. गणेशसहस्रनाम स्तोत्रम् मूल्य : 35/-
16. सामुद्रिक शास्त्रम् (मूल एवं भावार्थबोधिनी टीका सहित) मूल्य : 40/-
17. श्यामारहस्यम् (मूल एवं हिन्दी अनुवाद) प्रेस में
18. Mantra Mahodhadhi (Text in Nagari Script & Text in Roman with English Translation) by : Ram Kumar Rai
    Price : Vol. I Rs. 400/-, Price : Vol. II Rs. 400/-
19. Encyclopedia of Yoga (Ram Kumar Rai) Rs. : 200/-
20. Encyclopedia of Indian Erotices (Ram Kumar Rai) Rs. : 150/-
21. Dictionaries of TANTRASASTRA (Ram Kumar Rai) Rs. : 100/-
22. Rudratas Sringaratilaka and Ruyyaka's Sahridayalila Rs. : 40/-

12572